स्त्री "सितासिते यत्र सरिद्वरे शुभे" काशी०। अस्याः स्त्रीत्वेऽपि छन्दसीत्युक्तेः न ङः तेन ङीबपि न। ३देवले ऋषिभेदे पु०। "असितोदेवलोव्यासः स्वयञ्चैव ब्रवीषि मे" गीता। असितमुनिश्च हिमवतः एकपर्णां नाम सुतामुपयेमे यथाह हरि० १८ अ०। "तिस्रः कन्यास्तु मेनायां जनयामास शैलराट्। अपर्णामेकपर्णाञ्च तृतीयामेकपाटलाम्। तपश्चरन्त्यः सुमहद्दुश्चरं देवदानवैः। लोकान् सन्तापयामासुस्तास्तिस्रः स्थाणुजङ्गमान्। आहारमेकपर्णेन एकपर्णा समाचरत्। पाटलापुष्पमेकञ्च आदधावेकपाटला। एका तत्र निराहारा तां माता प्रत्यषेधयत्। उमा इति निषेधन्ती मातृस्नेहेन दुःखिता। सा तथोक्ता तदा-माता देवी दुश्चरचारिणी। उमेत्येवाभवत् ख्याता त्रिषु लोकेषु सुन्दरी तथैव नाम्ना तेनेह विश्रुता योगधर्मिणी"। एवं तिस्रःकुमारीर्वर्णयित्वा। "सर्व्वाश्च ब्रह्मवादिन्यः सर्व्वाश्चैवोर्द्धरेतसः। उमा तासां वरिष्ठा च ज्येष्ठा च वरवर्णिनी। महायोगबलोपेता महादेव मुपस्थिता। असितस्यैकपर्णा तु देवलस्य महात्मनः। पत्नी दत्ता तथा ब्रह्मन्! योगाचार्य्याय धीमते। जैगीष-व्याय तु तथा विद्धि तामेकपाटलाम्। एते कन्ये महा-भागे योगाचार्य्यमुपस्थिते"। ७शनौ च ८अप्सरोभेदे स्त्री "असिता च सुबाहुश्च सुवृत्ता मृदुका तथा"। हरि०व०।

**असितकार्च्चिस्** पु० असितयति णिच्–ल्युल् सा अर्च्चिः शिखा यस्य। वह्नौ तच्छिखासम्बन्धेन हि सर्व्वेषामसितत्वम्।

**असितगिरि** पु० कर्म्म०। नीलपर्व्वते नीलाचले। "असित-गिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्" पुष्पद०। असितनगादयोऽप्यत्र। "असितनगनितम्बश्यामभासां घना-नाम्"। किरा०। [ग्रीवश्चाग्नेः" यजु० २३।१३।

**असितग्रीव** पु० असिता ग्रीवा धूमेन यस्य। वह्नौ "असित

**असितफल** पु० असितं कृष्णं फलं यस्य। मधुनारिकेले।

**असितमृग** पु० कर्म्म०। कृष्णसारमृगे।

**असिताभ्रशेखर** पु०। बुद्धभेदे।

**असिताम्बुज** न० कर्म्म०। नीलपद्मे। [शिखे वह्नौ।

**असितार्च्चिस्** पु० असिता कृष्णा अर्च्चिः शिखाऽस्य। धूम-

**असितालु** पु० कर्म्म०। नीलालौ आलुभेदे।

**असिताश्मन्** पु०कर्म्म०। जातित्वेऽपि अनित्यत्वात् न०समा०। इन्द्र-नीलके मणिभेदे "नितम्बेषु नक्तमसिताश्मनां चयैः" माघः

**असितृ** त्रि० अस–क्षेपे तृच् स्त्रियां ङीप्। क्षेपके "स वज्र-स्यर्द्धरूपाणामस्त्राणामसितारिषु" भा०भी०प०।

**असितोत्पल** न० कर्म्म०। नीलोत्पले।

**असितोपल** पु० कर्म्म०। इन्द्रनीलमणौ।

**असिदंष्ट्र** पु० असिरिव तीक्ष्णा दंष्ट्रा यस्य। मकराख्ये यादसि। स्वार्थे कन् तत्रैव।

**असिद्ध** त्रि० सिद्धोनिष्पन्नः पक्वश्च न०त०। १अपक्वे, २अनि-ष्पन्ने च न्यायमते आश्रयासिद्धत्वादिभिर्दोषैर्दुष्टे ३हेतौ पु०। "अनैकान्तोविरुद्धश्चाप्यसिद्धःप्रतिपक्षितः। कालात्य-योपदिष्टश्च हेत्वाभासास्तु पञ्चधा" भाषा० असिद्धिशब्दे विवरणम्। अनुमानेन ४अनधिगते च "तस्मादपि चासिद्धं परोक्षमाप्तवचनात् सिद्धम्" सां०का०। ५सिद्धिशून्ये च "स्वयमसिद्धः कथं परान् साधयेत्" न्यायः।

**असिद्धि** स्त्री सिध–क्तिन् न०त०। १अनिष्पत्तौ, २पाकाभावे ३योगोक्तसिद्ध्यभावे न्यायमते ४आश्रयासिद्धिप्रभृतिहेतुदोषे च। सिद्धयश्च त्रिविधाः। "आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ। व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरत-स्त्रिधा। पक्षासिद्धिर्यत्र पक्षोभवेन्मणिमयोगिरिः। ह्रदो-द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत्,, इति च भाषा०। नीलधूमत्वं गुरु-तया न हेतुतावच्छेदकम् समानाधिकरणव्याप्यताव-च्छेदकधर्म्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् एतासां दूषकताबीजं तु असिद्धिसामान्यविशेषलक्षण कथनपूर्ब्बकं दर्शितं मुक्ता० यथा "आश्रयासिद्ध्याद्यन्य-तमत्वमसिद्धित्वम्। आश्रयासिद्धिः पक्षे पक्षतावच्छे-दकस्याभावः। यत्र काञ्चनमयः पर्व्वतो वह्निमानिति साध्यते तत्र पर्व्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमयपर्व्वते परामर्शप्रतिबन्धः फलम्। स्वरूपा-सिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः। अत्र च ह्रदोद्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलम्॥ साध्यासिद्धिरपि व्याप्यत्वासिद्धिः। सा च साध्ये साध्य-तावच्छेदकाभावः। तथा च काञ्चनमयवह्निमानित्यादौ साध्ये साध्यतावच्छेदकाभावे ज्ञाते साध्यतावच्छेदकविशिष्ट साध्यव्याप्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धःफलम्। सिद्धिः साध्यवत्तानिश्चयः अभावे न०त०। ५साध्यवत्ता-निश्चयाभावे "दृष्टान्तासिद्धेश्च" सां०सू०। दृष्टान्ते "क्षणिकत्वासिद्धेश्च न क्षणित्वानुमानम्" भा०। "स्थिर-